# III Semester B.B.A. Examination, November/December 2018
## (Freshers + Repeaters) (CBCS) (2015 – 16 & Onwards)
## LANGUAGE SANSKRIT – III
## Champu Ramayanam (Balakanda) Grammar & Translation

Time : 3 Hours Max. Marks : 70

***Instructions :*** *1) Answer in **Sanskrit/Kannada/English**.*
*2) Answer Q. No. **I, VI** and **VII** in **Sanskrit** only.*

I. समीचीनम् उत्तरं चिनुत । (10×1=10)

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Choose the correct answer.

1) नीलकण्ठविजयचम्पूकाव्यस्य कर्ता कः ?
अ) शिवकण्ठः आ) श्रीकण्ठः इ) नीलकण्ठः ई) विषकण्ठः

2) प्राचेतसः कस्य नाम ?
अ) व्यासस्य आ) बाणस्य इ) वाल्मीकेः ई) भासस्य

3) रघुवीरवृत्तं कौ अगायताम् ?
अ) कुशलवौ आ) रामलक्ष्मणौ
इ) भरतशत्रुघ्नौ ई) यमलौ

4) निखिलजगतिरक्षणे जागरूकः कः ?
अ) शिवः आ) विष्णुः इ) इन्द्रः ई) ब्रह्मा

5) रजनीचरचक्रवर्ती कः ?
अ) रावणः आ) विभीषणः इ) कुम्भकर्णः ई) इन्द्रजित्

6) प्राजापत्यः दशरथाय किं प्रायच्छत् ?
अ) अन्नं आ) क्षीरम् इ) पायसं ई) धनम्

7) दशरथस्य मन्त्री कः ?
अ) सुमन्त्रः आ) सुमित्रः इ) सुमतिः ई) सुदर्शनः

8) भरतस्य माता का ?
अ) कौसल्या आ) कैकेयी इ) मैथिली ई) सुमित्रा

P.T.O.

9) भोजस्य शैली का ?

अ) वैदर्भी आ) गौडी इ) पाञ्चाली ई) मागधी

10) विश्वामित्रः कः ?

अ) ऋषिः आ) गन्धर्वः इ) यक्षः ई) असुरः

II. द्वयोः प्रश्नयोः उत्तरं लिखत । **(2×10=20)**

ಎರಡು ಪ್ರಶ್ನೆಗಳನ್ನು ಉತ್ತರಿಸಿರಿ.

Answer **any two** of the following.

1) चम्पूकाव्यस्य उत्पत्तिः तथा विकासः ।

ಚಂಪೂ ಕಾವ್ಯದ ಉಗಮ ಮತ್ತು ವಿಕಾಸ.

Origin and development of Champukavya.

2) देवगणैः कृतविष्णुस्तुतिः ।

ದೇವತಾಗಣಗಳಿಂದ ಮಾಡಿದ ವಿಷ್ಣುವಿನ ಸ್ತುತಿ.

The praisings of Vishnu by the Gods.

3) देवैः अनूभूतानि सङ्कष्टानि ।

ದೇವತೆಗಳು ಅನುಭವಿಸಿದ ಸಂಕಷ್ಟಗಳು.

The problems faced by Gods.

III. a) 'द्वयोः श्लोकयोः अनुवादं कृत्वा भावं विवृणुत । **(2×4=8)**

ಎರಡು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿರಿ.

Translate and explain **any two** Shlokas.

1) वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशै-
स्तृप्तिं करोमि कथमप्यधुना बुधानाम् ।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरः पितॄणाम् ।।

2) तामावसद्दशरथः सुरवन्दितेन
सङ्क्रन्दनेन विहितासनसंविभागः ।
वृन्दारकारिविजये सुरलोकलब्ध-
मन्दारमाल्यमधुवासितवासभूमिः ।।

3) अम्भोजसंभवमनुं बहुभिस्तपोभि–
राराधयन्वरमवाप परैर्दुरापम् ।
तस्मादशेषभुवनं निजशासनस्य
लक्षीकरोति रजनीचरचक्रवर्ती ।।

4) अथ रामाभिधानेन सुरभयन् गिरः ।
अलंचकार कारुण्याद्रघूणामन्वयं हरिः ।।

b) गद्यभागम् अनुवदत । (1×4=4)

ಗದ್ಯಭಾಗವನ್ನು ಅನುವಾದಿಸಿರಿ.

Translate the following passage.

ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यमलोकेऽपि स्ववृत्तं प्रकाशयितुं भवन्तमेवोपतिष्ठमानयानया भारत्या रामचरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यान्तरधात् ।

**अथवा**

तदनु हविराहरणाय धरणौ कृतावतरणाः सर्वे गीर्वाणगणाः शतमश्वप्रमुखाश्चतुर्मुखाय दशमुख–प्रतापग्रीष्मोष्मसंप्लोषेणमावेद्य तेन सह शरणमिति शार्ङ्गधन्वानं मन्वाना नानाविधप्रस्तुतस्तुतयः क्षीराम्बुराशिमासेदुः ।

IV. **द्वयोः** वाक्ययोः ससन्दर्भं विवृणुत । (2×4=8)

ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭ ಸಹಿತ ವಿವರಿಸಿರಿ.

Explain with reference to context **any two** of the following.

1) पुण्यामवाप तमसां तमसां निहन्त्रीम् ।
2) मधुमयफणितीनां मार्गदर्शी महर्षिः ।
3) तेन वयं पराधीना इव भवाम ।
4) स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ।

V. **द्वयोः** लघुटिप्पणीं लिखत । (2×2½=5)

ಎರಡನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿಯನ್ನು ಬರೆಯಿರಿ.

Write short notes on **any two** of the following.

1) नलचम्पू
2) क्रौञ्चवधः
3) विश्वामित्रः
4) रावणः ।

VI. संस्कृतभाषया उत्तराणि लिखत । (5×1=5)

a) दोषान् परिहरत । (पञ्चानामेव)

1) गुरुं नमः
2) भवान् वद
3) महाराजा आगच्छति
4) रामस्य सह सीता वनं गच्छति
5) बालकः सर्पेण भीतः
6) इन्द्रं स्वाहा
7) बालकाः पठति
8) अलं विवादः ।

b) संस्कृतभाषया वाक्यं रचयत । (पञ्चानामेव) (5×1=5)

1) उक्त्वा
2) विद्यालयः
3) पठितुम्
4) अहम्
5) यदा–तदा
6) सर्वत्र
7) बहिः
8) कथम् ।

VII. संस्कृतभाषया अनुवदत । (1×5=5)

ಬ್ರಹ್ಮಾರಣ್ಯವೆಂಬ ಕಾಡಿನಲ್ಲಿ ಕರ್ಪೂರತಿಲಕವೆಂಬ ಆನೆ ಇತ್ತು. ಅದನ್ನು ನೋಡಿ ಎಲ್ಲಾ ನರಿಗಳೂ ಈ ರೀತಿ ಯೋಚಿಸುತ್ತಿದ್ದವು. "ಯಾವುದಾದರೂ ಉಪಾಯದಿಂದ ಈ ಆನೆಯು ಸತ್ತರೆ ನಮಗೆ ನಾಲ್ಕು ತಿಂಗಳು ಭೋಜನವು ದೊರೆಯುತ್ತದೆ." ಆಗ ಒಂದು ಮುದಿ ನರಿಯು "ನನ್ನ ಬುದ್ಧಿಪ್ರಭಾವದಿಂದ ಇದರ ಮರಣವನ್ನು ಸಾಧಿಸುತ್ತೇನೆ," ಎಂದು ಪ್ರತಿಜ್ಞೆ ಮಾಡಿತು.

There was an elephant named Karpooratilaka in the forest called Brahmaranya. All the jackals, having seen the elephant, were thinking thus- "If this elephant is killed then we will have enough food for four months." Then an old jackal took the oath thus – "I will kill this elephant by the power of my intelligence".